श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ पञ्चमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चमः सर्गः ॥

## रावणान्तःपुरे प्रतिगृहं सीताया अन्वेषणं कुर्वतो हनुमतस्तामदृष्ट्वा दुःखम्

ततः स मध्यङ्गतमंशुमन्तं
ज्योत्स्नावितानं मुहुरुद्वमन्तम्।
ददर्श धीमान् भुवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम्॥ **5.5.1** ॥

लोकस्य पापानि विनाशयन्तं
महोदधिं चापि समेधयन्तम्।
भूतानि सर्वाणि विराजयन्तं
ददर्श शीतांशुमथाभियान्तम्॥ **5.5.2** ॥

या भाति लक्ष्मीर्भुवि मन्दरस्था
यथा प्रदोषेषु च सागरस्था।
तथैव तोयेषु च पुष्करस्था
रराज सा चारुनिशाकरस्था॥ **5.5.3** ॥

हंसो यथा राजतपञ्जरस्थः
सिंहो यथा मन्दरकन्दरस्थः।
वीरो यथा गर्वितकुञ्जरस्थ -
श्चन्द्रोऽपि बभ्राज तथाम्बरस्थः॥ **5.5.4** ॥

स्थितः ककुद्मानिव तीक्ष्णशृङ्गो
महाचलः श्वेत इवोर्ध्वशृङ्गः।

हस्तीव जाम्बूनदबद्धशृङ्गो
    विभाति चन्द्रः परिपूर्णशृङ्गः ॥ **5.5.5** ॥

विनष्टशीताम्बुतुषारपङ्को
    महाग्रहग्राहविनष्टपङ्कः।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को
    रराज चन्द्रो भगवान् शशाङ्कः ॥ **5.5.6** ॥

शिलातलं प्राप्य यथा मृगेन्द्रो
    महारणं प्राप्य यथा गजेन्द्रः।
राज्यं समासाद्य यथा नरेन्द्र -
    स्तथा प्रकाशो विरराज चन्द्रः ॥ **5.5.7** ॥

प्रकाशचन्द्रोदयनष्टदोषः
    प्रवृद्धरक्षः पिशिताशदोषः।
रामाभिरामेरितचित्तदोषः
    स्वर्गप्रकाशो भगवान् प्रदोषः ॥ **5.5.8** ॥

तन्त्रीस्वराः कर्णसुखाः प्रवृत्ताः
    स्वपन्ति नार्यः पतिभिः सुवृत्ताः।
नक्तञ्चराश्चापि तथा प्रवृत्ता
    विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥ **5.5.9** ॥

मत्तप्रमत्तानि समाकुलानि
    रथाश्वभद्रासनसङ्कुलानि।
वीरश्रिया चापि समाकुलानि
    ददर्श धीमान् स कपिः कुलानि ॥ **5.5.10** ॥

परस्परं चाधिकमाक्षिपन्ति
    भुजांश्च पीनानधिविक्षिपन्ति।

मत्तप्रलापानधिविक्षिपन्ति
मत्तानि चान्योन्यमधिक्षिपन्ति ॥ **5.5.11** ॥

रक्षांसि वक्षांसि च विक्षिपन्ति
गात्राणि कान्तासु च विक्षिपन्ति ।
रूपाणि चित्राणि च विक्षिपन्ति
दृढानि चापानि च विक्षिपन्ति ॥ **5.5.12** ॥

ददर्श कान्ताश्च समालभन्त्य -
स्तथापरास्तत्र पुनः स्वपन्त्यः ।
सुरूपवक्त्राश्च तथा हसन्त्यः
क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥ **5.5.13** ॥

महागजैश्चापि तथा नदद्भिः
सुपूजितैश्चापि तथा सुसद्भिः ।
रराज वीरैश्च विनिःश्वसद्भिः
ह्रदा भुजङ्गैरिव निःश्वसद्भिः ॥ **5.5.14** ॥

बुद्धिप्रधानान् रुचिराभिधानान्
संश्रद्धधानान् जगतः प्रधानान् ।
नानाविधानान् रुचिराभिधानान्
ददर्श तस्यां पुरि यातुधानान् ॥ **5.5.15** ॥

ननन्द दृष्ट्वा स च तान् सुरूपान्
नानागुणानात्मगुणानुरूपान् ।
विद्योतमानान् स च तान् सुरूपान्
ददर्श कांश्चिच्च पुनर्विरूपान् ॥ **5.5.16** ॥

ततो वरार्हाः सुविशुद्धभावा -
स्तेषां स्त्रियस्तत्र महानुभावाः ।

प्रियेषु पानेषु च सक्तभावा
    ददर्श तारा इव सुस्वभावाः ॥ **5.5.17** ॥

स्त्रियो ज्वलन्तीस्त्रपयोपगूढा
    निशीथकाले रमणोपगूढाः।
ददर्श काश्चित् प्रमदोपगूढा
    यथा विहङ्गा विहगोपगूढाः ॥ **5.5.18** ॥

अन्याः पुनर्हर्म्यतलोपविष्टा -
    स्तत्र प्रियाङ्केषु सुखोपविष्टाः।
भर्तुः परा धर्मपरा निविष्टा
    ददर्श धीमान् मदनोपविष्टाः ॥ **5.5.19** ॥

अप्रावृताः काञ्चनराजिवर्णाः
    काश्चित्परार्ध्यास्तपनीयवर्णाः।
पुनश्च काश्चिच्छशलक्ष्मवर्णाः
    कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ **5.5.20** ॥

ततः प्रियान् प्राप्य मनोऽभिरामाः
    सुप्रीतियुक्ताः सुमनोऽभिरामाः।
गृहेषु हृष्टाः परमाभिरामा
    हरिप्रवीरः स ददर्श रामाः ॥ **5.5.21** ॥

चन्द्रप्रकाशाश्च हि वक्त्रमाला
    वक्राः सुपक्ष्माश्च सुनेत्रमालाः।
विभूषणानां च ददर्श मालाः
    शतह्रदानामिव चारुमालाः ॥ **5.5.22** ॥

न त्वेव सीतां परमाभिजातां
    पथि स्थिते राजकुले प्रजाताम्।

लतां प्रफुल्लामिव साधुजातां
दद‍र्श तन्वीं मनसाभिजाताम् ॥ **5.5.23** ॥

सनातने वर्त्मनि सन्निविष्टां
रामेक्षणीं तां मदनाभिविष्टाम्।
भर्तुर्मनः श्रीमदनुप्रविष्टां
स्त्रीभ्यः पराभ्यश्च सदा विशिष्टाम् ॥ **5.5.24** ॥

उष्णार्दितां सानुसृतास्रकण्ठीं
पुरा वरार्होत्तमनिष्ककण्ठीम्।
सुजातपक्ष्मामभिरक्तकण्ठीं
वने प्रनृत्तामिव नीलकण्ठीम् ॥ **5.5.25** ॥

अव्यक्तरेखामिव चन्द्ररेखां
पांसुप्रदिग्धामिव हेमरेखाम्।
क्षतप्ररूढामिव वर्णरेखां
वायुप्रभुग्नामिव मेघरेखाम् ॥ **5.5.26** ॥

सीतामपश्यन् मनुजेश्वरस्य
रामस्य पत्नीं वदतां वरस्य।
बभूव दुःखोपहतश्चिरस्य
प्लवङ्गमो मन्द इवाचिरस्य ॥ **5.5.27** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥